# भाट्टदीपिका

## प्रथमं सम्पुटम्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भूमिका

खण्डदेवाचार्यः नव्यन्यायपद्धत्या मीमांसा शास्त्रस्य परिष्करणे प्रथमं स्थानमधिरोहति। तद् विरचिता अध्ययनाध्यापनसंप्रदायेप्रचलिताश्च ग्रन्थाः भाट्टकौस्तुभः, भाट्टदीपिका, भाट्टरहस्यञ्चेति त्रयः। एतेषु भाट्टकौस्तुभः पूर्वमीमांसा दर्शनस्य विस्तृतव्याख्यानरूपः बहुविचारगर्भः प्रथमाध्यायद्वितीयपादमारभ्य तृतीयाध्याय बलाबलाधिकरणपर्यन्तः।

द्वितीयस्तुभाट्टदीपिका। अयं ग्रन्थः इतः पूर्वं द्विवारं मुद्रितः। प्रथमं मैसूरु नगरस्थ प्राच्य कोशालयेन मूलमात्रम्, अनन्तरं मद्रपुरी विश्वविद्यालयेन शम्भुभट्ट व्याख्यानसहितम्। तत्रापि द्वादशाध्यायपर्यन्तमेव। किन्तु संकर्षकाण्डाख्यस्योपरितनाध्यायचतुष्टयस्यापि भाट्टदीपिका हस्तलिखितामातृका सरस्वतीभवनकोशालये वाराणस्यां वर्तत इति ज्ञायते। अत्र ग्रन्थे नव्य न्यायशैल्या पदार्थाः परिष्कृताः।

आचार्यः खण्डदेवः कौस्तुभे, भाट्टदीपिकायाञ्चात्मानं रुद्रदेव सूनुं कीर्तयति। आचार्यः गागाभट्टः अस्यगुरुरासीत्। अस्याचार्यस्य कालः १५७५-१६६५ ए० डी० इति वाराणसेय सरस्वतीभवने उपलभ्यमानपत्र द्वारा ज्ञायते। पत्रमिदं विवाद व्यवस्थापकरूपं वाराणसेयानां सर्वेषां पण्डितानां हस्ताक्षरैः भूषितं वैक्रमे हेमलम्ब वत्सरे (१७१४ ए० डी०) लिखितमिति ज्ञायते। तन्मध्ये तत्र भवतां श्रीमतां खण्डदेवमहोदयानामपि हस्ताक्षराणि विलसन्ति। अतस्तत्कालजीविन इमे इति निश्चीयते।

मैसूरु नगरस्थ प्राच्यग्रन्थालयेनमुद्रितपुस्तकमवलम्ब्य छायाचित्रप्रणाल्या मुद्राप्यतेऽयं ग्रन्थः पठितॄणां सुलभोपलब्ध्यै। तदर्थं तेषां कृतज्ञताचावेद्यतेऽत्र।

—संपादकः

# भाट्टदीपिका प्रथमसम्पुट विषयसूचिका.

## प्रथमाध्यायस्य प्रथमः पादः.


| अधिकरणसङ्ख्या | | पुटसङ्ख्या |
|---|---|---|
| १ | धर्मजिज्ञासाप्रतिज्ञाधिकरणम् .... .... | 1 |
| २ | धर्मलक्षणाधीकरणम् .... .... .... | 3 |
| ३ | धर्मप्रमाणपरीक्षाधिकरम् .... .... | 5 |
| | धर्मस्य प्रत्यक्षाद्ययोग्यत्वनिरूपणम् .... .... | ,, |
| ४ | धर्मे चोदनाप्रामाण्याधिकरणम् .... .... | 6 |
| ५ | शब्दानित्यताधिकरणम् .... .... .... | 7 |
| ६ | वेदस्यार्थप्रत्यायकत्वाधिकरणम .... .... | 10 |
| | विधित्रैविध्यनिरूपणम् .... .... .... | 12 |
| | परिसङ्ख्याविधिनिरूपणम् .... .... | ,, |
| | नियमविधिनिरूपणम् .... .... .... | ,, |
| | अपूर्वविधिनिरूपणम् .... .... .... | ,, |
| ७ | वेदापौरुषेयत्वाधिकरणम् .... .... | 13 |


## प्रथमाध्यायस्य द्वितीयः पादः.


| | | |
|---|---|---|
| १ | अर्थवादाधिकरणम् (अर्थवादस्य प्रामाण्याधिकरणम्). | 15 |
| | लिङाद्यर्थनिरूपणम् .... .... .... | 22 |
| | शब्दभावानाया अंशत्रयनिरूपणम् ... .... | ,, |
| २ | विधिवन्निगदाधिकरणम् ... .... .... | 23 |

# भाट्टदीपिका

## द्वितीयं सम्पुटम्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भाट्टदीपिकाद्वितीयसम्पुटविषयाः.

तृतीयाध्यायस्य पञ्चमः पादः—


| अधिकरणानि. | | पुटानि. |
|---|---|---|
| 1 | प्रयाजादिभिः स्विष्टकृदादिशेषाननुष्ठानम् | 1 |
| 2 | साकंप्रस्थाय्ये शेषकर्माननुष्ठानम् | 2 |
| 3 | सौत्रामण्यां शेषकर्माननुष्ठानम् | 3 |
| 4 | सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानम् | 4 |
| 5 | सोमे शेषभक्षणम् | 5 |
| 6 | उद्गातॄणां सह सुब्रह्मण्येन भक्षः | 6 |
| 7 | ग्रावस्तुतस्सोमभक्षः | 8 |
| 8 | वषट्करणस्य भक्षनिमित्तता | 9 |
| 9 | होमाभिषवयोर्भक्षनिमित्तता | 11 |
| 10 | वषट्कर्त्रादीनां चमसे सोमभक्षः | 12 |
| 11 | होतुः प्रथमभक्षः | 13 |
| 12 | भक्षस्यानुज्ञापूर्वकत्वम् | 14 |
| 13 | एकपात्राणामनुज्ञापनम् | 15 |
| 14 | स्वयंयष्टुः भक्षास्तित्वम् | ,, |
| 15 | फलचमसस्येज्याविकारता | 16 |
| 16 | ब्राह्मणानामेव राजन्यचमसानुप्रसर्पणम् | 18 |


तृतीयाध्यायस्य षष्ठः पादः—


| | | |
|---|---|---|
| 1 | स्रुवादिषु खादिरतादिविधेः प्रकृतिगामिता | 20 |
| 2 | सामिधेनीनां सप्तदशसङ्ख्याया विकृतिगामिता | 21 |

श्रीः

# भाट्टदीपिका.

## तृतीयाध्यायस्य पञ्चमः पादः.

(१)—आज्याच्च सर्वसंयोगात् ॥ १ ॥ कारणाच्च ॥२ एकस्मिन् समवत्तशब्दात् ॥ ३ ॥ आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ॥ ४ ॥ अशेषत्वात्तु नैवं स्यात्सर्वादानादशेषता ॥ ५ ॥ साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥ अक्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥ चमसवदिति चेत् ॥ ८ ॥ न चोदनाविरोधाद्धविःप्रकल्पनाच्च ॥ ९ ॥ उत्पन्नाधिकारात्सति सर्ववचनम् ॥ १० ॥ जातिविशेषात्परम् ॥ ११ ॥ अन्त्यमरेकार्थम् ॥ १२ ॥

उपांशुयाजप्रयाजाज्यभागानुयाजादिद्रव्याणां जौहवादीनां स्विष्टकृदिडादीनि शेषकार्याणि कर्तव्यानि उत नेति चिन्तायां— "उत्तरार्धात्सकृत्सकृत्समवद्यति" "सर्वेभ्यो हविर्भ्यस्समवद्य-

# भाट्टदीपिका

## तृतीयं सम्पुटम्

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# भाट्टदीपिका तृतीयसम्पुटस्थ विषयाः.

अष्टमाध्यायस्य विशेषलक्षणस्य प्रथमः पादः—


| अधिकरणानि. | | पुटसंख्या. |
|---|---|---|
| 1. | विशेषकर्मणो धर्मातिदेश· | 1 |
| 2. | सोमे ऐष्टिकधर्मानतिदेश. | ,, |
| 3. | ऐन्द्राग्नादावैष्टिकादिधर्मातिदेश | 3 |
| 4. | फलादीनामनतिदेशः | 6 |
| 5. | गुणकामानां गोदोहनादीनामनतिदेशः | 8 |
| 6. | सौर्ये चरौ अभिमर्शनद्वयस्य विकल्पः | 10 |
| 7. | आग्नेयधर्मातिदेशः | 7 |
| 8. | द्रव्यदेवतयोरसन्निपाते द्रव्यस्य बलीयस्त्वम् | 12 |
| 9. | शतकृष्णले औषधधर्मातिदेशः | 14 |
| 10. | मधूदके उपांशुयाजीयाज्यधर्मातिदेशः | 16 |


अष्टमाध्यायस्य द्वितीयः पादः—


| अधिकरणानि. | | |
|---|---|---|
| 1. | ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशः | 17 |
| 2. | पशौ सांनाय्यधर्मातिदेशः | 19 |
| 3. | ,, पयोधर्मातिदेशः | 20 |
| 4. | आमिक्षायां पयोधर्मातिदेशः | ,, |
| 5. | द्वादशाहे सत्राहीनयोरव्यवस्थया धर्मातिदेशः | 22 |
| 6. | पञ्चदशरात्रादिषु सत्रधर्मातिदेशः | 23 |

इति दक्षिणादानाविधिस्सङ्गच्छते। एवं गवामयनादिसत्रेषु द्विरात्राद्यहीनेषु च सुत्यागणेषु द्वादशाहविकारत्वम्। अहोरात्रसाध्यकर्मवाचिपदवाच्यत्वसामान्यात्। अत्र हि रात्रिशब्दोऽहश्शब्दश्चाहोरात्रसाध्यकर्मविशेषपरः। सुत्यागणान्तर्गतत्वसादृश्याच्च द्वादशाहविकारत्वम्।

अत एव गवामयनादौ 'द्वाभ्यां लोमावद्यति' इत्यादिना द्वादशोपसत्त्वानुवादो विध्यन्तरस्तुत्यर्थस्सङ्गच्छते। स्थिते च द्वादशाहविकारत्वे प्रथमोत्तमौ वर्जयित्वा दशाहस्यैव प्रवृत्तिरिति वक्ष्यते। तत्रापि सत्रेषु सत्रात्मकस्याहीनेषु अहीनात्मकस्य द्वादशाहस्यावान्तरसादृश्यादित्यपि वक्ष्यते। सत्रेष्वपि यानि संवत्सरसाध्यानि सत्राणि तेषु संवत्सरसत्रत्वसामान्यादयनशब्दवत्त्वसामान्याच्च संवत्सरनियमादिधर्मलाभाय गवामयनस्य विध्यन्तः। अत एव गवामयनान्तर्गतमाहाव्रातिकं 'पलय उपगायन्ति' इति धर्मं विध्यन्तरस्तुत्यर्थं संवत्सरसत्रान्तरेऽनुवदति। ये तु 'साहस्रास्साद्यस्काः' इत्येवं एकसंज्ञायोगिनो यागास्ते सङ्घातरूपानिकाययोगान्निकायिन उच्यन्ते। तेषां य एवैको धर्मवान् तस्याधर्मकेषु प्रवृत्तिः एकसंज्ञायोगित्वसादृश्यात्। न चात्र नाम्नैवातिदेशः, सर्वेष्वपि मुख्यत्वेन तदसम्भवात्। एकत्र मुख्यस्य हि नाम्नोऽपरत्र गौणत्वे नामातिदेशः, न तु सर्वत्र प्रवृत्तिनिमित्तसत्त्वेन मुख्यत्वेऽपि। न चैवं प्रायणीयस्थलेऽप्येकसंज्ञायोगादतिदेशापत्तिः। तस्य प्राथम्यसिद्ध्यर्थत्वेन द्वादशाहिकद्वितीयाहर्धर्मदर्शनेन चानतिदेशकत्वात्। अत एव प्रयोजनान्तररहित एवैकसंज्ञायोगोऽतिदेशसाधकः। अत्र च य एव धर्मवान् तस्याधर्मकेषु प्रवृत्तिः। स पूर्वो वा उत्तरो वा युक्तिसाम्यात्। प्रायशः पूर्व एव तादृश इति सूत्रादौ तथोक्तिः।

# भाट्टदीपिका

## चतुर्थं सम्पुटम्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भाट्टदीपिका चतुर्थसंपुटस्थ विषयाः

अधिकरणसंख्या. पुटसंख्या.

## दशमाध्यायस्य पञ्चमः पादः


1 एकदेशग्रहणे प्राथमिकानामेव ग्रहणम् .... .... 1

2 एकत्रिके आद्ये तृचे गानम् .... .... 2

3 ,, एकस्यामृचि धूर्गानम् .... .... 4

4 द्विरात्रादिषु दशरात्रस्य विध्यन्तानुष्ठानम् .... .... 5

5 आधूननवपनार्थमन्त्राणामुपादानानियमः ... ... 7

6 विवृद्धस्तोमकेऽप्राकृतानां साम्नामागमः .... ... 8

7 बहिष्पवमाने ऋगागमः .... .... 9

8 सामिधेनीष्ववशिष्टानामागमेन संख्यापूर्तिः .... .... 10

9 षोडशिनः प्राकृतत्वम् ... .... 12

10 आग्रयणादेव षोडशिग्रहणम् .... .... 14

11 तृतीयसवन एव षोडशिग्रहणम् .... .... 16

12 षोषशिग्रहस्य सस्तोत्रशस्त्रत्वम् .... .... 17

13 अङ्गिरसां द्विरात्रे षोडशिनः परिसंख्या .... .... 20

14 नानाहीने षोडशिग्रहणम् .... .... 22

15 जगच्छन्दः जगतीपर्यायः .... .... 23

16 संसवादिषूपवत्यप्रवत्योरभावः .... .... 25

17 ऐन्द्रवायवस्य न सर्वादितः प्रतिकर्षः .... .... 27

18 ,, कांमसयोगेऽपि न प्रतिकर्षः .... .... 29

19 शुक्रमन्थ्यादेस्तु प्रतिकर्षः .... .... 30

अतश्च तदतिदेशापेक्षया गणत्वसादृश्यकल्पितातिदेशस्य विशेषनिष्ठत्वेन बलवत्त्वात्तेन त्र्यनीकातिदेशो युक्त एवेति वाच्यं, आवश्यकेन नाम्नैव यावदपेक्षितानामौपदेशिकानामातिदेशिकानां च धर्माणां प्राप्त्युपपत्तौ तस्यां विकृतौ ज्यौतिष्टोमिकधर्मातिदेशस्यैवाकल्पनात् ॥

न च तथाऽपि सुत्यान्तरार्थमवश्यकल्प्येन गणत्वसादृश्यातिदेशेनैव अग्रताप्राप्तिसम्भवे नामातिदेशस्य तत्प्रापकत्वे मानाभाव इति वाच्यं; श्रुतनाम्नस्तद्विषयत्वे सम्भवति अश्रुतस्यानुमानिकातिदेशस्य तद्विषयत्वकल्पनायोगात् ॥

वस्तुतस्तु—न गवामयनादौ सकलसुत्यासाधारण्येन 'गवामयनं द्वादशाहवत्कुर्यात्' इत्येवमेकोऽतिदेशः । तत्तत्सुत्यानां प्रत्येकसाधनीभूतानां समुच्चयेन प्रत्येकमेवेतिकर्तव्यताकांक्षत्वेन प्रत्येकमेवातिदेशकल्पनात् । अत एव 'गावामयानेकप्रथमदिनं द्वादशाहिकदशाहप्रथमदिनवत्कुर्यात्' इत्याद्याकारक एवातिदेशः। सर्वसाधारण्येनैकातिदेशकल्पनायां च द्वितीयादिष्वपि प्रथमाद्यहर्धर्मप्राप्त्यापत्तिः । तेन नामातिदेशाविषयसुत्यायां 'इयं सुत्या द्वादशाहिकतत्सुत्यावत्कार्या' इत्यतिदेशेन प्राकृततत्सुत्यावृत्त्यग्रताप्राप्तावपि नामातिदेशाविषयाभिप्लवादौ द्वादशाहिकतत्स्थानापन्नसुत्यातिदेशाकल्पनेन प्राकृततत्सुत्यावृत्त्यग्रताप्राप्त्यनुपपत्तेः । न हि त्र्यनीका नामानेकसुत्यासाधारणमेकमङ्गं येनावयवशः एकस्मिन्नेव न प्राप्येत, अपि तु तत्तद्विधिविहितास्तावत्योऽग्रतास्तत्सुत्यानामङ्गं, अतश्च गवामयने यैव सुत्या द्वादशाहिकयत्सुत्याविकारः तद्गताग्रता तत्र प्राप्यते नान्यगताऽन्यत्रेति नाभिप्लवादौ द्वादशाहतोऽग्रताप्राप्तिः ॥

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली